# Shri Rama Chintamani Prashna

# શ્રીરામચિન્તામણિપ્રશ્નઃ

## Document Information

Text title : Ramachintamani Prashnah

File name : rAmachintAmaNiprashnaH.itx

Category : raama, rAma

Location : doc_raama

Transliterated by : Meera Iyer

Proofread by : Meera Iyer

Latest update : October 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 28, 2025

*sanskritdocuments.org*

# શ્રીરામચિન્તામણિપ્રશ્નઃ

॥ શ્રીઃ ॥

અકારે પુત્રલાભાય સર્વલાભસ્તથૈવ ચ ।
સર્વલાભસમૃદ્ધિશ્ચ સન્તાનફલમુત્તમમ્ ॥ ૧॥

આકારે પલિતાસિદ્ધિઃ પલિતં પતિશોભનમ્ ।
સર્વકાર્યસમૃદ્ધિં ચ આકારેણ શુભં ભવેત્ ॥ ૨॥

ઇકારે શોકતાપં ચ યોગેભ્યો(મિત્ર)બાન્ધવઃ ।
સર્વકાર્ય વિનાશં ચ વૃત્તિહાનિર્ભવિષ્યતિ ॥ ૩॥

ઈકારે પુત્રલાભં ચ તથા ઐશ્વર્યમેવ ચ ।
પ્રમાણસર્વસિદ્ધિસ્તુ સૌખ્યં વાપિ ધ્રુવં ભવેત્ ॥ ૪॥

ઉકારે સર્વસિદ્ધિસ્તુ શોભનં શીઘ્રમેવ ચ ।
આયુષ્યં ચ જયં સૌખ્યં ઉકારે શોભનં ભવેત્ ॥ ૫॥

ઊકારે શોકસન્તાપં કલહં પ્રતિશિષ્યતિ ।
દુઃખપ્રાપ્તિમહાકાર્યા ઊકારે વાનિશં ભવેત્ ॥ ૬॥

ઋકારે ચ શુભં નિત્યં શુભાવસ્ય ચ સમ્પદઃ ।
ચિત્તાનન્દં કાર્યસિદ્ધિઃ શુભં ભવતિ નિશ્ચયઃ ॥ ૭॥

ૠકારે હૃદયક્લેશમર્થહાનિશ્ચ જાયતે ।
સર્વકાર્યવિનાશાય મનસ્તાપં ચ વિભ્રમમ્ ॥ ૮॥ (વિભ્રમઃ)

ઌકારે પુત્રલાભશ્ચ ભ્રાત્રા ચ પરિણં ગમઃ ।
અતિશીઘ્રં શુભઞ્ચૈવ સર્વલાભો ભવિષ્યતિ ॥ ૯॥

ૡકારે જનચિત્તં ચ મહાવ્યાધિર્ભવિષ્યતિ ।
સર્વકાર્યવિનાશાય અર્થહાનિશ્ચ જાયતે ॥ ૧૦॥

એકારે દૃશ્યતે લાભં દ્રવ્યલાભં ભવિષ્યતિ ।

કલ્યાણં પુત્રલાભં ચ આરોગ્યં સુખમેવ ચ ॥ ૧૧॥

ઐકારેણ વિનાશઃ ચ પુત્રેણ ચ વિરોધનમ્ ।
અન્યસ્થ ચિન્તિતં કાર્યં સર્વમેવ ભવિષ્યતિ ॥ ૧૨॥

ઓકારેઽર્થપ્રાપ્તિશ્ચ અર્થલાભં ભવિષ્યતિ ।
મનોવાઞ્છિતકલ્યાણં પુત્રમિત્રસમાગમમ્ ॥ ૧૩॥

ઔકારે અરિનાશશ્ચ દુઃખં કલહમેવ ચ ।
પ્રારમ્ભેષુ ચ કલ્યાણં તત્સર્વં નિષ્ફલં ભવેત્ ॥ ૧૪॥

અંકારે સમ્પદં બુદ્ધિસ્સુખં સન્તોષમેવ ચ ।
અર્થં ચ રૂપિણં યોગિસેવયૈવ ન સંશયઃ । ૧૫॥

અઃકારેણૈવ કાર્યાણિ કલહં દુઃખમેવ ચ ।
વિનાશં ચ મનસ્તાપં પુત્રહાનિશ્ચ જાયતે ॥ ૧૬॥

કકારે વિજયં રાજ્યં પુત્રલાભં શુભાવહમ્ ।
સર્વકાર્યાણિ સિદ્ધિં ચ કકારે વિનિવેશયેત્ ॥ ૧૭॥

ખકારે બહુદુઃખાય ધર્મહાનિસ્તથૈવ ચ ।
સર્વરોગમવાપ્નોતિ દારિદ્ર્યં ચ પુનઃ પુનઃ ॥ ૧૮॥

ગકારે શોભનં કાર્યં સર્વકાર્યં બલાબલમ્ ।
પુત્રલાભં ભવેત્તસ્ય સર્વાન્ કામાનવાપ્નુયાત્ ॥ ૧૯॥

ઘકારે દૃશ્યતે બોધં કાર્યસિદ્ધિં ચ જાયતે ।
સર્વકાર્યશુભં રાજ્યં કલ્યાણં નો ચ નિશ્ચયમ્ ॥ ૨૦॥

ઙકારે ધનસમ્પત્તિમર્પ્યતે ધનમેવ ચ ।
બન્ધનં અવમાનં ચ કાર્યહાનિર્ભવિષ્યતિ ॥ ૨૧॥

ચકારે વિજયં રાજ્યં શુભં સમ્પત્સુશોભનમ્ ।
અર્થલાભં મહાસૌખ્યં પુત્રલાભં ચ જાયતે ॥ ૨૨॥

છકારે જયસંયુક્તં રાજસી પરિભાવિકા ।
સૌભાગ્યં સુખમાયુષ્યં લોકપૂજાસ્વભાવકમ્ ॥ ૨૩॥

જકારે સ્વસૃલાભાય શોકરોગં ભવિષ્યતિ ।
પિતરં ચાવમાનેન જાયતે કલહં ભવેત્ ॥ ૨૪॥

ઝકારે દૃશ્યતે લાભં સર્વં સ પરિપૂર્ણતા ।
દીર્ઘાયુઃ પુત્રલાભં ચ આરોગ્યં ક્ષેમમેવ ચ ॥ ૨૫॥

ઞકારે શોકક્લેશં ચ આધિર્વ્યાધિર્ભવિષ્યતિ ।
બહુદુઃખમનસ્તાપં જાયતે નાત્ર સંશયઃ ॥ ૨૬॥

ટકારે દૃશ્યતે લાભં બન્ધુશ્ચૈવ સમાગમમ્ ।
ધનધાન્યસમૃદ્ધિં ચ સુખં ભવતિ નિશ્ચયમ્ ॥ ૨૭॥

ઠકારે પૂર્ણકુમ્ભં ચ શોભનં ચ ભવિષ્યતિ ।
આરોગ્યમર્થલાભં ચ પુત્રવૃદ્ધિં ચ જાયતે ॥ ૨૮॥

ડકારે દૃશ્યતે લાભં દીર્ઘમાયુષ્યવર્ધનમ્ ।
નિર્વિઘ્નક્ષેમમાયુષ્યં સુખં ભવતિ નિશ્ચયમ્ ॥ ૨૯॥

ઢકારે સર્વસૌખ્યં ચ આરોગ્યં શોભનં તથા ।
પ્રયાણે સર્વકાર્યં સ્યુઃ યદિ શત્રુજયં તથા ॥ ૩૦॥

ણકારેણ ફલં નિત્યં આયુર્વૃદ્ધિં ચ જાયતે ।
સર્વકામાનવાપ્નોતિ સુખં ભવતિ નિશ્ચયમ્ ॥ ૩૧॥

તકારે દીર્ઘમાયુષ્યં ક્ષેમં ચ સુતદારિકમ્ ।
આરોગ્યં અર્થલાભં ચ પુત્રવૃદ્ધિં ચ જાયતે ॥ ૩૨॥

થકારે નાસ્તિ બુદ્ધિં ચ ચિદ્દુઃખં તથૈવ ચ ।
નશ્યન્તિ સર્વકાર્યાણિ કાર્યસિદ્ધિર્ભવિષ્યતિ ॥ ૩૩॥

દકારે વિજયં રાજ્યં ધનલાભં તથૈવ ચ ।
પુત્રક્ષેમં ચ કાર્યાણિ સિદ્ધિર્ભવતિ નિશ્ચયઃ ॥ ૩૪॥

ધકારે ધનધાન્યં ચ સર્વલાભં તથૈવ ચ ।
પુત્રલાભં ચ યોગ્યં ચ ધકારૈકો વિનિર્દિશેત્ ॥ ૩૫॥

નકારે અર્થહીનં ચ આયુર્હાનિં ચ જાયતે ।
ચિત્તરોગમવાપ્નોતિ નાત્ર શ્રીઃ વિનિર્દિશેત્ ॥ ૩૬॥

પકારે દૃશ્યતે સર્વં ધનહાનિં ચ જાયતે ।
વ્યાકુલં સર્વદુઃખં ચ સર્વં સુખવિનાશનમ્ ॥ ૩૭॥

ફકારે કિઞ્ચિત્ સૌભાગ્યં બન્ધુશ્ચૈવ સમાગમમ્ ।
પિતૃપ્રિયં ચ કાર્યાણિ સર્વં શીઘ્રફલપ્રદમ્ ॥ ૩૮॥

બકારે નાસ્તિલાભાય અર્થહાનિં ચ જાયતે ।
મનોવ્યાધિં ચ કલ્યાણિ મનોવ્યાધિં ચ નિષ્ફલમ્ ॥ ૩૯॥

ભકારે દૃશ્યતે ભદ્રં બન્ધૂજન સમાગમમ્ ।
સર્વકાર્યાણિ સિધ્યન્તિ બૃહત્કાર્યં ભવિષ્યતિ ॥ ૪૦॥ (બૃહત્કાર્યં વતીભુવિ)

મકારે દુઃખસન્તાપં રોગહાનિશ્ચ જાયતે ।
ગમને બન્ધુનાશાય ચિન્તયેવ ભવિષ્યતિ ॥ ૪૧॥

યકારે તુ ફલં વિત્તં દૃશ્યતે યસ્વ તત્ફલમ્ ।
ફલં ચ લભતે દૃશ્યતે વા - - સુસમ્પદા ॥ ૪૨॥

રકારે વ્યાહતે પીડા ન કાર્યસફલં ભવેત્ ।
પુત્રહાનિર્ભવેન્નિત્યં દ્રવ્યહાનિં ચ જાયતે ॥ ૪૩॥

લકારે દૃશ્યતે પૂર્વયદ્દુઃખજ સમાગમમ્ ।
મહદ્ભિશ્ચૈવ કાર્યાણિ દૃશ્યતે અસ્ય સમ્પદા ॥ ૪૪॥

વકારે શુભદં કાર્યં પ્રાપ્યતે ભદ્રમન્ત્રકઃ ।
રાજતં (ત્વથ)વા શુભ્રં દીર્ઘાયુષ્યસિદ્ધિદમ્ ॥ ૪૫॥

શકારે શયનં યાનં વસ્તુવાહનમેવ ચ ।
રાજ્યં શુદ્ધાન્ન સદ્ભાશં શુભં ચૈવ ભવિષ્યતિ ॥ ૪૬॥

ષકારે સર્વકાર્યાણિ ધનધાન્યં તથૈવ ચ ।
કુલં ચ સર્વકાર્યાણિ દૃશ્યતે સર્વપારગૈઃ ॥ ૪૭॥

સકારેઽત્ર પણં ચૈવ શ્રવણં ચ પ્રભાવતમ્ ।
વસ્તુલાભં વિવાહં ચ પુત્રલાભં ચ જાયતે ॥ ૪૮॥

હકારે ધ્યાનમાપ્નોતિ વિત્તસમ્પ્રાપ્યવાહનમ્ ।
આરોગ્યં વ્યાધિનાશાય લભતે નાત્ર સંશયઃ ॥ ૪૯॥

ળકારે અર્થહાનિં ચ આયુર્દુઃખાનિ જાયતે ।
ચિત્તરોગમવાપ્નોતિ ળકારે નો વિનિર્દિશેત્ ॥ ૫૦॥

॥ ઇતિ શ્રીરામચિન્તામણિપ્રશ્નશાસ્ત્રં સમાપ્તમ્ ॥

Notes:

Here are 50 verses each starting with a letter in Sanskrit alphabets. It is an anonymous Jyotiṣa work published in The Journal of the Thanjavur Sarasvati Mahal Library, volume 47.

RamachintamaniPrashna looks to be similar to Rama Ajnaa Prashna of Goswami Tulsidas. In this method, the querent thinks of a Prashna (question) and he selects a particular alphabet from probably a grid or similar, after praying to Lord Rama. For each alphabet, a chaupai is somehow determined from Ramacharitamanas.
The RamaChintamaniPrashna looks similar. The querent will possibly identify an alphabet and the specific couplet from this text will give the answer andor direction.

Additionl information in Tamil is available in the referenced link.

Encoded and proofread by Meera Iyer

---

*Shri Rama Chintamani Prashna*
pdf was typeset on October 28, 2025

Please send corrections to *sanskrit@cheerful.com*